# तृतीयप्रकरणम्
# वैदिकवाङ्मये प्रमुखसूक्तेषु समाजव्यवस्थायाः दार्शनिकविचाराः


३.१ पुरुषसूक्ते समाजव्यवस्थायाः दार्शनिकविचाराः ।

३.२ प्रजापतिसूक्ते समाजव्यवस्थायाः दार्शनिकविचाराः ।

३.३ भगसूक्ते समाजव्यवस्थायाः दार्शनिकविचाराः ।

३.४ सवितासूक्ते समाजव्यवस्थायाः दार्शनिकविचाराः ।

३.५ सूर्यसूक्ते समाजव्यवस्थायाः दार्शनिकविचाराः ।

३.६ विष्णुसूक्ते समाजव्यवस्थायाः दार्शनिकविचाराः ।

३.७ वाणीसूक्ते समाजव्यवस्थायाः दार्शनिकविचाराः ।

३.८ आत्मज्ञानसूक्ते समाजव्यवस्थायाः दार्शनिकविचाराः ।

३.९ ईशसूक्ते समाजव्यवस्थायाः दार्शनिकविचाराः ।

३.१० शान्तिपाठसूक्ते समाजव्यवस्थायाः दार्शनिकविचाराः ।

३.११ इन्द्रसूक्ते समाजव्यवस्थायाः दार्शनिकविचाराः ।

# तृतीयप्रकरणम्
# वैदिकवाङ्मये प्रमुखसूक्तेषु समाजव्यवस्थायाः दार्शनिकविचाराः

## ३.१ पुरुषसूक्ते समाजव्यवस्थायाः दार्शनिकविचाराः

वैदिकवाङ्मये जगतः उत्पत्तेः प्रारभ्य सकलजनानां सर्वप्राणिनाञ्च समृद्धिपरिपूर्णजीवनं केन प्रकारेण भवेदिति विचारपूर्णाः दार्शनिकव्यवस्था वर्णितास्ति । जगतः उत्पत्तिः विराट्पुरुषात् भवति, स विराट्पुरुषः कीदृशः विद्यते । यथा –

सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
स भूमि विश्वतो वृत्वात्यतिष्ठत् दशाङ्गुलम् ॥[१]

ऋग्वेद – १०/९०/०१

यः पुरुषः सर्वव्यापकः, तं विना निखिलेऽस्मिन् ब्रह्माण्डे किमपि नास्ति, अर्थात् स एव सर्वव्यापकोऽस्ति । तद्विचारः मन्त्रेऽस्मिन् प्रतिपादितः । वर्णनेन यथा स सहस्रशीर्षः, सहस्राक्षः, सहस्रपात्, स एव ब्रह्माण्डं सर्वतः विस्तीर्य, तदुपरि दशदिक्षु व्याप्य विराटपुरुषः उपविष्टः विराजते । एतदेव विशालपुरुषस्य सर्वव्यापकत्वमग्रिमेऽपि मन्त्रे दर्शितम् । यथा –

पुरुष एवेदं सर्वं यद् भूतं, यच्च भव्यम् ।
उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥[२]

ऋग्वेद – १०/९०/०२

---

१ ऋग्वेद – १०/९०/०१
२ ऋग्वेद – १०/९०/०२

इदमेव विशालपुरुषस्य व्यक्ताव्यक्तस्वरुपं यथा प्रतिपाद्यते ।

एतावानस्य महिमातो ज्यार्याश्च पुरुषः ।

पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥[१]

ऋग्वेद–१०/९०/०३

तस्मादुत्पन्नं जगदिदं कथं सञ्जाते विद्यते । तद्यथा –

त्रिपादुर्ध्वम् उदैत पुरूषः पादोऽस्येहाभवत् पुनः ।

ततो विष्वङ् व्यक्रामत् साशनानशने अभि ॥[२]

ऋग्वेद–१०/९०/०४

यज्ञसंस्थायां विराट्पुरुषस्य भूमिका अपि मन्त्र द्वारा विज्ञायते । यथा

यत् पुरुषेण हविषा देवा यज्ञमवतन्वत ।

वसन्तो अस्यासीदाज्यं ग्रीष्म हृध्मः शरद्धविः ॥[३]

ऋग्वेद–१०/९०/०५

इत्थं सृष्टिस्वरूपविज्ञाने प्राणिसृष्टेः, देवसृष्टेः अपि वर्णनमुपलभ्यते । यथा –

तस्माद् यज्ञात् सर्वहुतः संभृतं पृषदाज्यम् ।

पशून् तांश्चक्रे वायव्यानाख्यान् ग्राम्याश्च ये ॥[४]

ऋग्वेद–१०/९०/०८

---

१. ऋग्वेद – १०/९०/०३
२. ऋग्वेद – १०/९०/०४
३. ऋग्वेद – १०/९०/०५
४. ऋग्वेद – १०/९०/०८

तस्माद्यज्ञप्रभावादेव अश्वाः गवादयः पशवोऽजायत । यथा

तस्मादश्वा अजायन्त ये के चोभयादतः ।
गावो ह जज्ञिरे ततस्मात् तस्माज्जाता अजावयः ॥[१]
ऋग्वेद–१०/९०/१०

अर्थात् देवैः यज्ञद्वारा पुरुषादेव अश्वादयः पशवः प्राप्यन्ते । तस्मादेव गावः, वृषभादयः प्राप्ताः । अथ तत एव अजाः, मेषादयश्च पशवः अलभन्त ।

अश्वादीनां पशुसृष्टिवत् मानवसृष्टेः अपि सर्जनं पुरुसूक्तानुसारेण यज्ञमयविशालपुरुषादेव सञ्जातं वर्तते । तस्यापि वर्णनं मन्त्रेऽस्मिन् प्रतिपादितं दरीदृश्यते । यथा –

ब्राह्मणोऽस्य मुखमासद् बाहू राजन्यः कृतः ।
ऊरु तदस्य यद् वैश्यः पद्भ्यां शूद्रो अजायत ॥[२]
ऋग्वेद–१०/९०/१२

वर्णव्यवस्थायाः उत्पत्तिसम्बन्धे विदुषां विमतैक्यं विद्यते । अतो हि वर्णव्यवस्थायाः उत्पत्तेः सम्बन्धे नैकेषां विदुषां मतानुसारं परम्परेयं यथारुपं प्रतीता जायते ।

## वर्णव्यवस्थापरम्परायाः आधारः

वर्णव्यवस्थायाः उत्पत्तेः सम्बन्धे परम्पराप्राप्तः सिद्धान्तोऽयं सर्वप्राचीनः विद्यते । सिद्धान्तमिमं परिपुष्टं ऋग्वेदे वर्णितपुरुषसूक्तस्य आधारेण स्वीक्रियते । तच्चोपरि कथितमन्त्रद्वारा सम्यक्तया विज्ञायते । अर्थात् तस्य विराट्पुरुषस्य मुखात् ब्राह्मणस्य, भुजः क्षत्रियस्य, उर्वोः वैश्यस्य तथा पद्भ्यां

१ ऋग्वेद – १०/९०/१०
२ ऋग्वेद – १०/९०/१२

शुद्रस्य उत्पत्तिः सञ्जाता । महर्षिव्यासेनापि श्रीकृष्णमुखाद् निगदितम् इदमेव वर्णव्यवस्थायाः विज्ञानम् । यथा –

चातुवर्ण्यं मया सृष्टं गुणकर्मविभागशः ।
तस्यकर्तारमपि मां विद्धयकर्तारमव्ययम् ॥[१]

गीता–४/१३

मनुस्मातावपि वर्णव्यवस्थायाः विज्ञानमिदं वर्णितमस्ति तद्यथारूपं प्राप्यते ।

लोकानां तु विवृद्धयर्थं मुखबाहुरुपाहृतः ।
ब्राह्मणं क्षत्रियं वैश्यं शूद्रं च निरवर्तयता ॥[२]

मनुस्मृति – १/३१

अर्थात् मनोः मतानुसारं वर्णानामुत्पत्तिः लोकानां विवृद्धयर्थं विद्यते । अत्र तथ्यमिदं प्रतीयते यत् वर्णानां उत्पत्तिः विराट्पुरुषस्य विभिन्नेभ्यः अङ्गेभ्यः सञ्जातास्ति, तद् अङ्गानाम् उत्पत्तेः क्षमतायाः प्रतीकात्मकं विद्यते, तथा च अङ्गानां श्रेष्ठत्वस्यानुसारं विशेषतापि वर्णानां दर्शिता विद्यते । यथा प्रत्येकस्य अङ्गस्य शरीरस्यास्तित्वस्यकृत्ते विशेषकार्यं भवति, तथैव समाजस्य सत्तायां प्रत्येकवर्णस्य विशेषकार्यं निश्चयेन भवति । यथा ब्राह्मणस्योत्पत्तिः मुखादजायत, इत्थं ब्राह्मणस्य कार्यं मखसम्बन्धित भवति, अर्थात् ज्ञानसम्बद्धं कार्यं तस्य मुख्यकर्तव्यं वर्तते । यथा –

ज्ञानविज्ञानमास्तिक्यं ब्रह्मकर्मस्वभावजम् ।[३]

गीता–१८/४२

---

१ गीता–४/१३

२ मनुस्मृति–१/३१

३ गीता – १८/४२

बाहु: शक्ते: द्योतकमस्ति, अतो हि क्षत्रियाणां तत्सम्बन्धितं कर्म वर्तते । अर्थात् मनष्याणां रक्षाकार्यं तेषां कर्तव्यं निश्चितमस्ति । अर्थात् मनुष्याणां रक्षाकार्यं तेषां कर्तव्यं निश्चितमस्ति । यथा ह्युक्तम् –

शौर्यं तेजो धृतिदाक्ष्यं युद्धे चाप्यपलायनम् ।
दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजम् ॥[1]

गीता–१८/४३

अर्थात् शौर्यं, तेज:, धृति:, दाक्ष्यं, युद्धे, अपलायनं, दानं, ईश्वरभावत्यञ्चैतानि क्षत्रियाणां स्वाभाववविकानि सहजानि कर्माणि सन्ति ।

तृतियवर्षीयानां वैश्यानामपि कर्माणि गीतायां वर्णितानि सन्ति । यथा–

कृषिगौरक्ष्यवाणिज्यं वैश्यकर्म स्वभावजम् ।[2]

गीता–१८/४४

एतदेव वर्णनं श्रीमहाभारते प्राप्यते तद्यथास्ति ।
कृषि–वाणिज्यगोरक्षां कुसीदंतुर्यमुच्यते ।
वार्ता चतुर्विधातत्रवयंगोकृतयो निशम् ॥[3]

अर्थादुभयोरपि तात्पर्यं विद्यते कृषि:, गवांरक्षणं, वाणिज्यं(व्यापारकर्म) इमानि व्यापारवाणिज्ययसम्बन्धितानि समस्तकार्याणि वैश्यानां स्वभावजानि सन्ति । अर्थात् मानवशरीरे ऊर्वो: पादयो: च कार्यं गतिशीलताप्रदानस्य

---

१ गीता – १८/४३

२ गीता – १८/४४

३ श्री म.भा. – १०/२८/२१

वरीवर्ति तेन ज्ञायते यत् समाजरचनायां वैश्यवर्णस्य कार्य प्रगतेः दिशासूचनस्य, विकासलक्षि च विद्यते ।

अन्तिमचतुर्थवर्णः शूद्रः अपि विराट्पुरूषस्य पद्भ्यामजायत । अतोहि शूद्रेभ्यः सेवाकार्यं प्रदत्तम् । यथा हयेवमुच्यते –

परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजम् ।[1]

गीता–१८/४४

इत्थं समाजे विभिन्नसमुदाये श्रमविभाजनद्वारा समाजस्य समस्तकार्याणि सम्यक्तया सञ्चालयितुं विराट्पुरुषेण चतुर्वर्णानां संरचना विहिता । जनः जनमुपरि प्रभावी न स्यात् अतः विराट्पुरुषेण कोऽप्येकः वर्णः सर्वशक्तिमान् न दर्शितः ।

## कर्मधर्माधारिता वर्णव्यवस्था

कर्मधर्माधारितापि वर्णस्योत्पत्तिं विचारयितुं शक्यते । वर्णव्यवस्था समाजव्यवस्थायाः अभिन्नमेकं अङ्गं वर्तते । समाजव्यवस्थां संयोजयितुं तत्कालीनसमाजस्य मूलभूतावश्यकतां सम्यक् समाजस्य विभिन्नवर्णानां यथो चितं श्रमविभाजनं तस्य नियमेपूर्वकं पालनं यथा रूपं विधीयते । वेदकालीन समये समाजस्य सृष्टेः आधारभूता निम्नाङ्किताः चतस्रः आवश्यकताः आसन् ।

(क) अध्ययनं–अध्यापनम्, धार्मिककर्म ।

(ख) समाजसुरक्षा, राज्यव्यवथायाः सञ्चालनम् ।

---

१ गीता – १८/४४

(ग) आर्थिकक्रियानां सम्पूर्तिः ।

(घ) समाजस्य सेवाकार्यम् ।

समाजस्य सुचारुरुपेण संचालनं विधातुं इदमतीव आवश्यकमस्ति, यत् समाजस्य नियतभागेषु विभाजनं कृत्वा, तेषां च कर्मणां विभाजनंविधाय समाजस्य आवश्यकताः सम्पूरयेत् । इत्थं समाजस्य चतुर्षुः वर्णेषु विभाजनं विधीयते । येन ते स्वकर्मसु सुचारुरुपेणपालनं कुर्युंः सफलाश्च स्युः ।

## गुणस्य आधारेणेयं व्यवस्था

वर्णानामुत्पत्तिः गुणानामाधारेण विवेचयितुंशक्यते, श्रीकृष्णभगवतापि स्वयं स्वमुखाद्गीतायां कथितम् ।

चातुर्वण्यं मया सृष्टं गुणकर्मविभागशः ।[१]

मनुस्मृति-अ.१२/२६,२७

अर्थात् वचनस्यास्यानुसारं व्यक्ति कस्य वर्णस्य सदस्योऽस्ति तद् महत्वपूर्णंनास्त्यपितु तस्मिन् कीदृशाः गुणाः दृश्यन्ते प्राप्यन्ते वा इति । अर्थात् वर्णानां विभाजनं व्यक्तिगतस्वभावाधारितमस्ति ।

भारतीय परम्परानुसारं त्रयो गुणाः भवन्ति । सतोगुण, रजोगुणः तमोगुणश्चेति । मनो मतानुसारं यास्मिन् जने मनुष्ये वा यस्य गुणस्य प्रधानत्वं विद्यते, तदनुसारमेव तज्जनस्य विशिष्टवर्णस्य निर्धारणं जायते । मन्वनुसारं ज्ञानं सत्वगुणस्य, अज्ञानं तमोगुणस्य, रागद्वेषौ रजोगुणस्य लक्षणमस्ति ।

१ मनुस्मृति–अ.१२/२६, २७

सत्वगुणप्रधानः ब्राह्मणः, रजोगुणबहुलः क्षत्रियः, तमोगुणप्रधानौ वैश्यशूद्रौ स्तः, अर्थात् तदनुरूपाणि कर्माणि तेभ्यः प्रदातव्यानि ।

इत्थं चतुर्णां वर्णानां विभाजनं तेषां स्वभावानुसारं गुणानामाधारेण कृतमस्ति ।

## जन्मनः आधारेण वर्णव्यवस्था

मुख्या कतिपयाः विद्वांसः मन्यन्ते यत् वर्णविभाजनस्य मुख्याधारः जन्म एवास्ति । यस्य मानवस्य जन्म यत्र वर्णे भवति तत्पितुः अनुसारं तद्वर्णीयः एव स जायते । कर्माधारिता चेत् वर्णव्यवस्था निश्चीयते, तर्हि द्रोणाचार्यः क्षत्रियः भवितुं शक्नुयात्, कथम् ? तस्य व्यवसायः शस्त्रशिक्षायाः तथा युद्धस्यचासीत् । किन्तु तस्मै तेन कदापि क्षत्रियसञ्ज्ञा नादायि, किन्तु उत्पत्तेः अनुसारं तस्मै ब्राह्मणसंज्ञा एव प्रदत्ता भवति । अश्वत्थामा क्रूरकर्मा भवन्नपि ब्राह्मण आसीत् । पापकर्म कृत्वापि सः अवध्यः दर्शितः शास्त्रेण ।

उवाच चासहन्त्यस्य बन्धनानयनं सती ।
मुच्यतामुच्यतामेष ब्राह्मणो नितरां गुरुः ॥[१]
भागवत – १/७/४३

महात्मा युधिष्ठिरः प्रत्यङ्गसत्वगुणपरिपूर्णः आसीत्, तस्य स्वभावोऽपि कटुवचनानि श्रुत्वापि क्षमाप्रदायकः अभवत् । क्षमा च ब्राह्मणस्य विशिष्टम् आभूषणमस्ति, किन्तु तद्गुणयुक्तः युधिष्ठिर भूत्वा अपि क्षत्रिय एव निगदितः । गुणः परिवर्तनशीलः भवति । गुणानां कस्मिन्नपि क्षणे व्यक्तौ परिवर्तनं जायते, किन्तु वर्णस्य न कदापि ।

---

१ भागवत १/७/४३

अत: उपर्युक्त विवेचनानुसारं इदमुदीरयितुं शक्यते यत् वर्णव्यवस्था जन्माधारितास्ति । जन्मन: आधारेण स जन्मत: आरभ्य मृत्युं यावत् तद्वर्णीय: कथ्यते, पूर्वजपराम्परावर्णे तस्य प्रजापि तद्वर्णीया एव गण्यते ।

## चतुर्वणानां कर्तव्याधिकारा:

### (१) ब्राह्मण

वैदिकसमाजे ब्राह्मणानां सर्वश्रेष्ठं स्थानमभवत् । वेदेषु, ब्राह्मणग्रन्थेषु, धर्मशास्त्रेषु च ब्राह्मणस्य 'भूदेव' इति सञ्ज्ञया स्थानं स्वीकृतं विद्यते । देवा: तु परोक्षदेव: किन्तु ब्राह्मणा: प्रत्यक्षदेव: मन्यते, जगदिदं ब्राह्मणद्वारा धारितमस्ति । ब्राह्मणप्रसादादेव देवा: स्वर्गस्थिता: सन्ति । एतैरुक्तशब्दा: कदापि मिथ्या न भवन्ति । जपतपव्रतादिसर्वदोषा: ब्राह्मणस्वीकृतिद्वारा एव विनश्यन्ति । ब्राह्मणवच: देववचनं मन्यते स्म, स एव सर्वदेवमयोऽस्ति । ब्राह्मण: सर्वप्रकारमुक्त: आसीत् । श्रोत्रिय: ब्राह्मण: अवध्य:, अबन्ध्य:, अदण्ड्य: अबहिष्कार्य:, अपरिवाद्य:, अपिरहार्यश्च मन्यते स्म ।

सामान्यत: अध्यापनं, पौरोहित्यं, दानग्रहणञ्चैते त्रय: ब्राह्मणस्य विशेषाधिकारा: आसन् । कार्यत्रयेषु एतेषु अन्येषां वर्णानामिषदपि हस्तक्षेप: नाभवत् । इतरवर्णानां कर्तव्यनिर्धारणं, जीविकासञ्चालनं, साधननिर्देश: इत्यादे: सम्यगाचरणस्य समालोचनात्मकं अधिकार: ब्राह्मणस्य समीपेऽभवत् । प्राप्तधनेषु ब्राह्मणस्य विशेषाधिकार: आसीत् । इतरेषां धनं राजा ग्रहणं करोति स्म । ब्राह्मण: चतुर्वणानां कन्या पत्नीत्वेन स्वीकरोति स्म । इत्थं समाजे ब्राह्मणानां सर्वोच्चं स्थानं, प्रतिष्ठा चाभवत् ।

शमः, दमः, तपः, शौचः, क्षमा, सरलता, ज्ञानं, विज्ञानं, अस्तिक्यं ब्राह्मणस्य स्वाभाविकानि कर्माणि अभवन् । अध्यापनम्–अध्ययनं, यजनं–यजानं, दानं–प्रतिग्रहः षडेतानि ब्राह्मणस्य विशेषकर्माणि आसन्

## (२) क्षत्रियः

ब्राह्मणानां पश्चात् समाजे क्षत्रियाणा सर्वोच्चं स्थानं मभवत्व तैत्तिरीयसंहितायां क्षत्रियः राजारूपेण स्वीक्रियते । "ब्रह्न वै ब्राह्मणः क्षत्रं राजन्यः"[११] समाजे क्षत्रियाणां रूपद्वयं प्रचलितमस्ति । प्रथमः क्षात्रधमनिर्वाहिकाः, द्वितीय प्रजाः उपरि शासनकर्ता । ऋग्वेदस्य प्रथममण्डले 'क्षत्र' शब्दस्य प्रयोगः पराक्रमस्य अर्थे प्राप्यते किन्तु चतुर्थ मण्डले राष्ट्रशासकस्य अर्थे प्रयुज्यते । क्षत्रियाणां कृते 'राजन्यः' एवं राष्ट्रशासकः तेषां प्रभुतायाः, उच्चसामाजिक प्रतिष्ठायाश्च द्योतकः विद्यते ।

'क्षत्रिय' शब्दस्य व्युत्पत्तिमूलकोऽर्थः अन्येषां रक्षकः (क्षतात्त्रायते) । प्रजानां रक्षणे निपुणः, शूरः, पराक्रमी, दुष्टदलने समर्थः व्यक्तिः क्षत्रियं, कथ्यते । क्षत्रियाणां सम्पत्तिः शास्त्रमेवासीत् । यथा चोक्तम् –

लोकसंरक्षणे दक्षः शूरोदान्तः पराक्रमी ।
दुष्टनिग्रहशीलयः स वै क्षत्रिय उच्चते ॥[१]

शुक्रनीति १/४१

इत्थं प्रजापालनं, धर्मयुद्धः न्यायसम्मतशासनं, दानं, यजनं, विविधविद्यानां ज्ञानार्जनं क्षत्रियाणां परमकर्तव्यानि आसन् ।

---

१ शुक्रनीति–१/४१

## (३) वैश्यः

वैश्यस्य स्थानं समाजे ब्राह्मणाक्षत्रिययोः, पश्चात् समागच्छति । ऋग्वेदे वैश्यशब्दस्य कृते 'विश्' शब्दस्य प्रयोगः प्राप्यते । वैश्याना शिक्षा-दीक्षादि क्षत्रियब्राह्मणब्रह्मचारिणां सहैवाभवत । वैश्यानां गणना द्विजातिषु क्रियते स्म । वैश्यानां सामर्थ्यं राज्यसभापर्यन्तं अभवत्, इत्यनेन अनुमीयते यत् व्यारविषयकपरामर्श सम्प्रदाने वर्गस्यास्य प्रतिनिधित्वं राजसभायामक्त आवश्यकं मन्यते स्म । किन्तु उत्तरवैदिकयुगे वैश्यानां स्थानं निम्नस्तरीयमासीत् ।

इति वर्णनेन अनुमीयते यत् कृषिः, पशुपालनं वाणिज्यञ्चेतत् अर्थोत्पादकं आजीविकाप्रधानकर्मकरणात् वैश्यानां वर्णत्रयेषु स्थानं प्राप्तमभवत् । किन्तु समाजे तेषां प्रतिष्ठा आसीत् । विष्णुपुराणानुसारं ब्रह्मणा वैश्यस्य जीविकायाः कृते त्रीणि कर्माणि निर्धारितानि सन्ति (१) कृषिः (२) पशुपालनं (३) वाणिज्यञ्चेति । यथा चोक्तम् -

पशुपाल्यं च वाणिज्यं कृषिं च मनुजेश्वरः ।
वैश्याय जीविका ब्रह्माददौ लोकपितामहः ॥[१]

विष्णुपुराण-३/८/३०

गीतानुसारमपि वैश्यानां यत्कर्म विद्यते तदग्रे दर्शितम् । पशुपालनं, दानं, व्यापारकरणं, धनेन धनार्जनं, कृषिः वैश्यस्य प्रधानकर्माणि सन्तीति मनुमतानुसारमुच्यते ।

उपर्युक्त वर्णनेन इत्थं विज्ञायते पौरोहित्यं, वेदाध्ययनं, प्रतिग्रहकार्याणि विहाय सर्वब्राह्मणोचितकार्याणि वैश्यः विधातुं शक्तोऽभवत् ।

---

१ विष्णुपुराण-३/८/३०

## (४) शूद्रः

शूद्राणां स्थानं  वर्णपरम्परायां अन्तिममासीत् । ते च वर्णाधर्माः जानन्ति स्म । त्रयाणां वर्णानां सेवाकरणं तेषां परमकर्तव्यमभवत् । मनोः मतानुसारं तेषां ब्राह्मणानां सेवाकार्यार्थं एव बह्मणा उत्पत्तिः कृता आसीत् । समाजे तेषां स्थितिः दयाजनिका अभवत् । एते शुद्धवस्त्राणि, भोजनमपि नालभन्त ।

आपस्तम्बधर्मसूत्रानुसारं शुद्रवधात् तदेव पापं भवति यत् काक-मयूर-चक्रवाक-हंस-नकुल-श्वादीनां वधात् भवति । शूद्राणां वैदिकक्रियाकाण्डस्य, अग्निप्रज्वालनस्यापि अधिकारो नाभवत् । वेदपठनस्य, वेदमन्त्रश्रवणस्यापि अधिकारो ना भवत् । यथा भागवते कथितम् -

स्त्रीशूद्राद्विजबन्धूनांत्रयी न श्रुतिगोचरः ॥[१]

भागवत्-१/४/२५

गौतममतानुसारं यदि शुद्रः संविज्ञाय वेदस्मरणं, वेदपाठश्रवणं कुर्यात्तहि तस्य कर्णेषु अपखलोहं, लाक्षंवा वा पूरयेत् । यदि सः वेदमन्त्रोच्चारणं कुर्यात् तर्हिं तस्य जिह्वाकर्तनं कुर्यात् । यथा वचनमिदं उपलभ्यते ।

अथ हास्यवेदभयश्रृण्वतस्रपुजवुभ्यां स्रातेपूरण -

महाहरेण जिह्वाच्छेदो धारणे शरीरभेदः ॥[२]

गौतम-१२/४

---

१. भागवत-१/४/२५

२. गौतम-१२/४

याज्ञवक्यस्मृत्यनुसारं शूद्रः त्रिवर्णान् सेवयेत । कृषिः, पशुपालनं, भारवाहनं, क्रय-विक्रयं, चित्रकरणं, नृत्यं, संगीतस्य चेत्यादि कार्यं कुर्यात् ।

इत्थमिदमेव गीतानुसारं वर्णत्रयस्य सेवाकरणमेव शूद्रस्य स्वाभाविकं कर्म विद्यते ।

परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजम् ॥[१]

गीता-१८/४४

अनेन प्रकारेणोपर्युक्त - विविधमतानुसारं स्पष्टं विज्ञायते यत् वैदिककालीनसमाजे शूद्राणां स्थानं निम्नस्तरीयमभवत् । तेषा शिक्षा, भोजन, वस्त्रादीनामपि कोऽपि चिन्तनं नाकरोत् । अतः ते वणत्रयस्य दासत्वं स्वीकृत्य समाजे निवसन्ति स्म ।

इत्थमत्र पुरूषसूक्ते वर्णचतुष्टयस्योत्पत्तिद्वारा भारतीयसमाजस्य वैदिकसमाजस्य वा दार्शनिकविचारैः इयं समाजस्य वर्णव्यवस्था गुणकर्मजन्मतरज्ञानविभागैः निर्धारिता अभवत् । तदत्र पुरूषसूक्तचिंतनेन विभन्नमतैः वर्णनद्वारा इषदत्राक्षरविन्यस्तम् ।

## ३.२ प्रजापतिसूक्ते समाजव्यवस्थायाः दार्शनिकविचाराः ।

सूक्तमिदं ऋग्वेदस्य दशममण्डलस्य १२१ सूक्तस्य क्रमे समागच्छति । सूक्तमिदं प्रजापतिसूक्तमपरं हिरण्यगर्भसूक्तस्य नामद्वारापि प्रसिद्धमस्ति । 'प्रजापति-हिरण्यगर्भ' अभिधानेन देवस्य स्तुतिमाहात्म्यमत्र वर्णितं विद्यते । तत्र समाजनिर्माणस्य आदिसर्जनं हिरण्यगर्भस्य विशदसङ्कल्पना द्वारा सञ्जातम्, एतरप्यत्र मन्त्रव्याख्याया अवगम्यते । यथा -

१. गीता-१८/४४

हिरण्यगर्भः समवर्तताग्रे

भूतस्य जातः पतिरेकः आसीत् ।

स दग्धार पृथिवीं द्यामुतेमां

कस्मै देवाय हविषा विधेम ॥[१]

ऋग्वेद-१०/१२१/०१

य आत्मदा बलदा यस्य विश्वं

उपासते प्रशिषं यस्य देवाः ।

यस्य छायामृतं यस्य मृत्युः

कस्म देवाय हविषा विधेम् ॥[२]

ऋग्वेद-१०/१२१/०२

हिरण्य-गर्भः (हिरण्यमयस्य गर्भभूतः) हिरण्य ब्रह्माण्डकारणं (हिरण्यमयं ब्रह्माण्डं गर्भवद् यस्योदरे वर्तते) अर्थाह गर्भस्वरूपं ब्रह्माण्डं यस्य उदरे वर्तते । अयं हिरण्यगर्भः (प्रजापतिः) सर्वप्रथमतः उपस्थितः अभवत् । स सर्जनादौ ससर्ज । स एवैकः निखिलब्रह्माण्डस्य स्वामी सञ्जातः । सः भूमिमिमां, वियदिदञ्च सञ्दधार । स दिव्यरुपः प्रजापतिरस्ति ।

अर्थात् हिरण्यगर्भः अग्रजः भूत्वा सर्वेषां स्वामी वर्तते । इदमेव न, किन्तु सकलप्राणिनां प्रेरणादाता वर्तते । अतः सः समस्तान् प्रशास्ति ।

द्वितीयमन्त्रे अयं प्रजापतिः अस्मभ्यं जीवनसमृद्धिं प्रयच्छति, स ए व प्रजापतिः स्वमहतः सामर्थ्यात् जडचेतनेषु सकलपदार्थमात्रेषु विराजमानोऽस्ति । स एव समस्तप्राणिनां, सकलमनुष्याणाञ्चेश्वरोऽस्ति ।

---

१. ऋग्वेद-१०/१२१/१

२. ऋग्वेद-१०/१२१/२

इत्थमत्र पर्यावरणस्य सर्जनस्य सर्वप्रथमस्थिते: उल्लेखं विधाय कथम् ? सर्वमिदं समुत्पन्नम् । तदिह दिङ्मात्रं दर्शितम्, तमुपर्यैव सामाजिक व्यवस्थाया: कार्यं प्रचलति । अर्थात् जगत: व्यवस्था तात्विकविचारै: कथम् ? विज्ञायते ? इति प्रजापतिसूक्तस्य हिरण्यगर्भविज्ञानस्य सञ्ज्ञानद्वारा प्रतिपद्यते ।

## ३.३ भगसूक्ते समाजव्यवस्थाया: दार्शनकविचारा:

भगसूक्तं वेदस्यातीव प्रसिद्धं सरलञ्च सूक्तमस्ति द्वादशादित्येषु 'भग' नाम्न: आदित्यस्य स्तवनमत्र विद्यते । कुत्रचित् श्रुतमपि वर्तते । यथा -

आदित्यस्य नमस्कारं ये कुर्वन्ति दिने दिने ।
जन्मान्तरसहस्रेषु दारिद्रयं नोपजायते ॥

अर्थात् सूर्यदेवताया: स्तवनं समाजस्य कृते समृद्धिप्रदायकं वर्तते, तदत्र सूक्तस्य मन्त्रविवेचनाद्वारा अपि विज्ञास्याम: । 'भग-भगवान्' अर्थात् ऋग्वेदे 'भगवान् ' शब्दस्य अर्थ: इश्वर: नापितु 'भाग्यशाली अर्थस्य वाचकोऽस्ति' अर्थात् वयं समृद्धियुक्ता:, वैभवशालिन:, भाग्याशालिनो भूत्वा समाजस्य दार्शनिकविचारै: परियुक्तं निर्माणं कथं कुर्याम ? इत्येव सुक्तादस्मात् विजानीयात् । यथा -

अयं मे हस्तो भगवान् अयं मे भगवत्तर: ।

मे अयं हस्त: भाग्यशाली, अयमपर: विशेष: भाग्यशाली विद्यते । अर्थात् समृद्धिरेव संसूच्यते । मानवजीवनस्य प्रगति: समृद्धिर्वा प्रातकालीनादेव प्रचालिता भवति । समृद्धिसचारस्य आधारभूत: प्रात:काल: कीदृशो भवेदिति अत्र प्रस्तुतमस्ति । यथा -

प्रातरग्निं प्रातरिन्द्रं हवामहे

प्रातर्मित्रावरुणा प्रातरश्विना ।

प्रातर्भगं पूषणं ब्रह्मणस्पतिं

प्रातः सोममुत रुद्रं हुवेम ॥[1]

ऋग्वेद -७/४१/०१

अर्थात् प्रातःकाले एव वयं सज्जनाः साधकजनाः अग्नेः, इन्द्रस्य, मित्रवरुणयोः, अश्विनीकुमारयोः, भगस्य, पूष्णः, ब्रह्मणः च आह्वानं कुर्मः । प्रातरेव सोमं रुद्रञ्च हुवेम । अर्थादत्र प्रातः कालादेव देवस्तवनद्वारा समृद्धिपूर्णस्य दार्शनिकविचारयुक्तस्य समाजस्य विभावना वर्णितावलोक्यते । अन्यत्र यथा -

प्रातर्जितं भगभुग्रं हुवेम

वयं पुत्रमदिते यो विधार्ता ।

आध्रश्चिद्रं यं मन्यमानस्तुरश्चिद्

राजा चिद् यं भगं भक्षीत्याह ॥[2]

ऋग्वेद-७/४१/०२

अर्थात् निर्धनः इव सामान्यजनोऽपि भगवन्तं स्वीकरोति, धनिकः राजा अपि विश्वसिति ।

साधकः वसिष्ठमनिः भगवतः समीपे स्वीयस्य आन्तरिकीं, सामाजिकीञ्च संपत्तिं प्राप्तुं स्तुतिं विदधानि । अग्रिमेऽस्मिन् यथाविधं वर्णितमस्ति ।

भग् प्रणेतर भग सत्यराधो

---

१. ऋग्वेद-७/४१/०१

२. ऋग्वेद-७/४१/०२

भगेमां धियभुदवा ददन् नः ।

भग प्रणे जनय गो भिरश्वैर्

भग पृन्टभिर्नृवन्तः स्याम ॥[1]

ऋग्वेद–७/४१/०३

भगवतः समीपे भक्तः यः इच्छति, तत्केलं भौतिककामनाः न सन्ति, अपि तु तत्तु सर्वदेवानां कृपा–अनुग्रहस्य बुद्धेःकामनास्ति । अथ च भक्तजनः भगवतः समीपे भाग्यवन्तं भवितुमिच्छति । अर्थात् समाजः समृद्धिसहितं भक्तिभावयुक्तं, आध्यात्मनिरतं कथंस्यात् ? इत्यपि चिन्तनेन प्रतीयते । भौतिकसंपत्तिसहितं दैवी समाप्तिसहितञ्च समाजः भवेदिति अत्र प्रस्तुतं यथा –

भग एव भर्गवाँ अस्तु देवास्

तेन वयं भगवन्तः स्याम ।

तं त्वा भग् सर्व इज्जाहर्वाति

सनो भग पुर हता भवेह ॥[2]

ऋग्वेद–७/४१/५

अर्थात् हे दिव्यप्रेरणाप्रदायकाः देवगणा । वयं भगवता कृपापात्राः भूत्वा भाग्यशालिनः स्याम सततम् । हे भगवन् । त्वम् अस्माकम् अग्रेसरः भव, अत्र चागत्य अस्माकं निकटे निवसतु । एतत्विचारैः सह प्रकृतिदेवीं उषादेवीमपि अत्र प्रार्थयति । कारणंयत् विना अपि प्रकृतिं पुरुषस्य, चैतनशक्तेः गतिः प्रगतिः अवरुद्धा भविष्यति ।

---

१. ऋग्वेद–७/४१/०३

२. ऋग्वेद–७/४१/५

समध्वरायोषसो नमन्त

दधिक्रावेव शुचये पदाय ।

अर्वाचीनं वसुविदं भगं नो

रथमिवाश्वा वाजिन आ वहन्तु ॥[१]

ऋग्वेद-७/४१/६

अश्वावती गोमती र्न उषासो

वीरवतीः सदमुच्छन्तु भद्राः ।

धृतं दुहाना विश्वतः प्रपीता

यूदं पात स्वस्तिभिः सदा नः ॥[२]

ऋग्वेद-७/४१/०७

प्रथममन्त्रस्य विचाराः विज्ञापयन्तीदं भगवन्तमिव विविधाः प्राकृतिकशक्तयोऽपि समृद्धिसम्प्रदायिकाः सन्ति । भावर्मिमं हृदि निधाय ऋषिः स्वातन्त्र्येण उषादेवीं स्तौति । अर्थात् समृद्धसमाजस्य निर्माणार्थें प्रकृतेः शक्तयः महत्वपूर्णाः दर्शनशास्त्रविचारयुक्ताः वा सन्ति । इत्यत्र विचारान् अवर्णयन् ।

अन्तिममन्त्रविचाराः कथयन्ति यत् प्रकृतेः शक्तिः उषादेवी भवती अश्वावर्ता, गोमती, वीरवती, भ्रद्रसन्ततिसहिता भवति । अतो हि कल्याणकारिणीं भूत्वा अश्वादीन् गृहीत्वा अस्मासु निवसतु । सह सर्वविधैः कल्याणस्य गुणैः अस्मदीयमनवरतं रक्षणं करोतु । अस्मिन् विविच्यते यत् समाजव्यव्यवस्था इयं यश्वादीनां सर्वसमृद्धियुक्ता प्रकृति द्वारा भवेत् । तेन

१. ऋग्वेद-७/४१/६
२. ऋग्वेद-७/४१/०७

च तात्विकविचाराः दृढीभूय समाजव्यवस्याः कल्याणं केन प्रकारेण स्यादिति, विज्ञानं वर्णितमस्ति ।

सङ्क्षेपेण तु इदं कथनं युक्तं स्यात्, यत् समाजव्यवस्थायाः सर्वाविधेन समृद्धिकरणेन सह दार्शनिकविचाराः जनमनसि केनप्रकारेण क्रियान्विताः स्युरिति सम्यक्तया भगवसूक्तस्य तत्वचिन्तनेन, दार्शनिकदृष्टया हवा विज्ञातुं शक्यते । अत एव अत्र सूक्ते पदे पदे सामाजिकव्यवस्थायाः दार्शनिकविचाराः सहजैव विलोक्यन्ते । इतोऽप्यधिकं विशदं व्याख्यानं भवितुं शक्यते, किन्तु विस्तारभयादत्रैवोपप्रकरणमिदं समाप्यते ।

## ३.४ सवितासूक्ते समाजव्यवस्थायाः दार्शनिकविचाराः

ऋग्वेदस्येदमेकं प्रसिद्धं सूक्तमस्ति । यस्य देवता सवितादेवः वर्तते । सवितादेवस्य आराधना विश्वामित्रेण ऋषिणा गायत्रीच्छन्दस्यः ऋचा कृतास्ति । यश्च गायत्रीमन्त्रः नाम्ना विख्यातोऽस्ति । सविता सप्तदेवानां सम्बन्धः अविनाभावेन युक्तोऽस्ति, अर्थात् 'सवितादेवः' इत्यानेन तस्य प्रसिद्धिरस्ति ।

सूक्तस्यास्य ऋषिः हिरण्यस्तूपः वर्तते । तस्मिन् एकादश ऋचो विद्यन्ते । यस्यादिमा नवमी चर्क् जगतीच्छन्दसि, इतरा त्रिष्दुप्छन्दसि निबद्धाः सन्ति । एतासु एकादशसु ऋचासु सूक्तात्मकासु सवितादेवस्य दार्शनिकस्वरूपस्य बोधो जायते । प्रथमश्च मन्त्रोऽयमस्ति । यथा –

ह्दयाम्यग्निं प्रथमं स्वस्तये
ह्पयामि मित्रावरुणा विहावसे ।
ह्पयामि रात्रीं जगतो निवेशनी

हयायाभि देवं सवितारमूतये ॥[1]

ऋग्वेद – १/३५/०१

आकृष्णेन रजसा वर्तमानो

निवेशयन्नमृतं मर्त्यं च ।

हिरण्ययेन सविता रथेना

देवो याति भुवनानि पश्यन् ॥[2]

ऋग्वेद–१/३५/०२

मन्त्रयोरत्र जगतः जनानां कृते प्रेरणादायकः, अहोरात्रं प्रेरकः, सवितादेवस्य स्मरणं कृतं विद्यते, येन समाजजनानां जीवानां जीवनं उत्साहपूर्णं, आशान्वितञ्च सर्वदा स्यादिति, कामना ऋषिभिः विहिता विद्यते । सम्पत्तौ विपत्तौ तस्य साहचर्यं सदैव स्यादिति कथितम् ।

अविरतगतिशीलः सवितादेवः वर्तते । यथा धरां स्थिरीकृत्य चक्रं भ्रमति, तद्वात् अस्माकं कर्माणि प्रेरणादायकः भावसमर्पकः, सवितादेवः अस्माकं निराशां, मन्दतां, द्ररिदतां इरीकरोति । सवितुः अविरतगतिः अस्मदीयान पापान्, सन्तापांश्च इरकर्त्रीविद्यते । इतरे मन्त्रे एकस्मिन् कथ्यते । यथा –

वि सुपर्णो अन्तरिक्षारव्यव्यद्

गभीरवेयाः असुरः सुनीथः ।

कवेइदानीं सूर्यः कश्चिकेत

कतमां द्यां रश्मिरस्या ततान ॥[3]

ऋग्वेद – १/३५/०७

---

१. ऋग्वेद–१/३५/०१

२. ऋग्वेद–१/३५/०२

३. ऋग्वेद–१/३५/०७

प्रात:कालादेव सूर्यमण्डलेन जगदुपरि स्वप्रकाश: प्रसारित: विद्यते, तस्य चाधिष्ठाता सवितादेव: अपि स्वीयान् साकजनान् प्ररयितुं समागत: अस्ति । भावोऽयं ऋषिकवि: प्रकटं विद्धीयते । अर्थात् समाजव्यवस्थायां प्रेरणास्रोत: सततं कथं ? प्रवहेत् इति लक्षणं, कर्तव्यं वा सवितादेवस्येह प्रतिपाद्यते । अन्यच्च अग्रे वण्यते । यथा –

हिरण्यपाणि: सविता विचर्षणि
रूभे द्यावापृथिवी अन्तरीयते ।
अपाभीवा बाधते वेति सूर्य
मभि कृष्णेन रजसा द्यामृणोति ॥[१]

ऋग्वेदन – १/३५/९

सर्वजनप्रेरक:, सर्वान् सन्मार्गगामी सवितादेव: विद्यते । य: सवितादेव: बलवान्, आततायिनां निहन्ता विद्यते स: देव: सायंकाले यज्ञाशालयां उपस्थीयते । ऋन्विज: तं स्तौति ।

ये ते पन्था: सवित: पूर्व्यासोऽ
रेणव: सुकृता अन्तरिक्षे ।
तेभिर्नो अद्य: पृथिभि: सुगेभी
रक्षा च नो अधि च ब्रूहि देव ॥[२]

ऋग्वेद–१/३५/११

स्तुत्यात्मकेऽन्तिमे मन्त्रे हे देव ! न: रक्ष । इति प्रार्थना कृता विद्यते ।

---

१. ऋग्वेद–७/३५/९
२. ऋग्वेद–१/३५/११

सवितादेवस्य स्तुतिता लोकमनसि, जनानां वा चेतसि आशाभावः, नवप्रेरणा, कर्मनिष्ठता, कार्यपरायणता, कर्तव्यभावः केन प्रकारेण सञ्चरेदिति विभावना सूक्तमाध्यमेन समाजव्यवस्थायाः कृते, लोककल्याणस्य कृते वा वर्णितं दरीदृश्यते ।

## ३.५ सूर्यसूक्ते समाजव्यवस्थायाः दार्शनिकविचाराः

सूक्तस्यास्य व्याख्यां कुर्वाणः वेदभाष्यकारः सायाणाचार्यः लिखति यत्, सूर्यमण्डलमन्तर्वास्तिव्यः सूर्यः अन्तर्यामी भवन् सर्वेषां प्रेरकः परमात्मा वर्तते, स्थावरजङ्गमादीनां समस्तपदार्थानाम् आत्मस्वरूपः परीवर्ति । अर्थात् सूक्तेऽस्मिन् परमात्मनः परब्रह्मणः स्वरुपस्य सूर्यस्य वर्णनेन समाजव्यवस्थायाः दार्शनिकविचाराः प्रतिपादिताः बहुषु स्थलेषु दृश्यते । मतमिदं समर्थयन् सायणाचार्यः उल्लेख्यति । 'स हि सर्वस्य स्थावरजङ्गमस्य कार्यवर्गस्य कारणम् । कारणाच्य कार्यं नातिरिच्यते । अर्थात् स एव सूर्यदेवः सकलचलाचलस्य कारणमस्ति । कारणाच्च कार्यं कदापि भिन्नं न भवति । सूक्तमिंद 'सूयोपस्थानम्' इति संज्ञारूपेणापि प्रसिद्धं वर्तते, ब्राह्मणाश्च नित्यसन्ध्यायाः समये तस्य गानं विदधति । यथा

चित्रं देवानामुदगानीकं
चक्षुर्मित्रस्य वरुणस्याग्नेः ।
आप्रा द्यावापृथिवी अन्तरिक्षं
सूर्य आत्मा जगतस्तस्थुषश्च ॥[१]

ऋग्वेद १/११५/०१

---

१. ऋग्वेद–१/११५/०१

आश्चर्यमस्त्ययं सूर्यः सूर्यमण्डलस्य केवलं भौतिकपदार्थः नास्ति । मित्रवरुणाग्निदेवादीनां स्थिरनयनं वर्तते । सूर्यः तु आकाशं, पृथ्वीं, अन्तरिञ्च स्वतेजसा स्वचैतन्यप्रकाशन वा पूरयति । सर्वप्रेरकः सूर्यः अन्तर्यामी वर्तते । यः स्थावरजङ्गमयोः, जडचेतनयोः, भोग्यमोस्त्रादीनां पदार्थानामन्तर्यामी, आत्मास्ति ।

भावार्थस्य सारभूतार्थः चेत् शोधयामः तर्हि, सूर्य स्वकीया कर्मजनिकया प्रेरणाद्वारा सकलसमाजव्यवस्थां प्रभावयति, यतोहि मानवाः प्रगतिकामाः भवन्ति । समाजस्य आभ्यन्तरवर्ति यदालस्यं वसति, तदपि दूरीकरोति । यथा –

तन्मित्रस्य वरुणस्याभिचक्षे
सूर्यो रूपं कृणुते द्योरुपस्थे ।
अनन्तमन्यदरुशदस्य पाजः
कृष्णमन्यद्धरितः संभरन्ति ॥[१]
ऋग्वेद–१/११५/०५

अर्थात् अरुणोदयात् एव सप्ताश्वान् विगृहय, रथमारुह्य सूर्यस्य आगमनं भवति । सः सूर्यः परमं कृपानिधानं परमेश्वरं भूत्वा भक्तजनानां कल्याणं विदधाति । अस्मादेवोच्यते "सूर्योदयात् अस्माकं पापानि, निन्दाच दरीभूयात्" । इमां प्राथनां सर्वदेवान् उद्दिश्य ऋषिः विदेधाति । अर्थात् वयं पापकर्म, निन्दा, आलस्य इत्यादिभिः रहिताः कथं स्याम, इत्यत्र सूर्यसूक्तमाध्यम दर्शितम् । स्तुतिश्च यथा अनेन प्रकारेण –

१. ऋग्वेद–१/११५/०५

अद्या देवा उदिता सूर्यस्य

निरंहसः पिपृता निरवद्यात् ।

तन्नो मित्रो वरुणोमामहन्ता

मदितिः सिन्धुः पृथिवी उत द्याः ॥[१]

ऋ.वे.१/११५/०६

अर्थात् समस्तान् सामाजिकान् प्राणिनः स्वप्रभावात् पापाकर्मरहितान् करोतु । अन्ये च मित्रवरुणादितिसिन्धु, पृथ्व्यादयोः देवाः सत्कर्मणि अस्मान् नियोजयतु । सूर्यसूक्तमाध्यमेन एतत् दर्शितमस्ति यत्, सकलेयं समाजव्यवस्था दार्शनिकैः तात्विकैश्च विचारैः अभियुक्ताः, अभिभूता वा कथं स्यादिति ? ईदृशीयदा समाजव्यवस्था भविष्यति तर्हि समस्तमानवाः, प्राणिनो वा दुरितानि कर्माणि विहाय, अवश्यं सत्कर्मणि निरताः भविष्यति । अनेन समाजः दार्शनिकविचारैः परिपूर्णः, आदर्शसमाजो भविष्यति, तच्च निशङ्कम् ।

इत्थमत्र समाजव्यवस्थायाः सत्कर्मनिर्देशमाध्यमेन दार्शनिकविचाराः अवलोक्यन्ते ।

## ३.६ विष्णुसूक्ते समाजव्यवस्थायाः दार्शनिकविचाराः

सक्तस्यास्य समीक्षणं पुरुषसूक्तेन सह कर्तुंयोग्यं वर्तते । पुरुषसूक्ते दर्शितमस्ति यत्, "पादोऽस्य सर्वा भूतानि ।" अर्थात् तस्मिन्नेके पुरुषस्य चरणे एव जगतः सर्वप्राणिनां पदार्थाः समविष्टाः सन्ति । तस्यैव सिद्धान्तस्य प्रतिपादनं – समर्थनंपात्र विलोक्यते । अस्य सूक्तस्य ऋषिः दीर्धतमसः विद्यते सूक्तस्य षड् ऋचः, अनुष्टुप छन्दः, देवश्च विष्णुः वर्तते ।

---

१. ऋग्वेद–७/११५/०६

यस्य त्रिपादविन्यासद्वारा पृथ्व्यन्तरिक्षस्वर्गलोकाः परिमापिताः सन्ति । कार्यमेतद्वारा समाजस्य कृते दार्शनिकविचाराः प्राप्यन्ते । यथ –

प्रतद् विष्णुः स्तवते वीर्येण
मृगो न भीमः कुचरो गरिष्टाः ।
यस्योरुषु त्रिषु विक्रमणेष्व
चिक्षियन्ति भुवनानि विश्वा ॥[१]
अथर्व.वे.७/२६/०२

प्र विष्णवे शूषमेतु मन्म
गिरिक्षितं अरुगायाय वृष्णे ।
य इदं दीर्घं प्रयतं सधस्थम्
एको विममे त्रिभिरित पदेभिः ॥[२]
अथर्व.वे.७/२६/०३

मन्त्रयोरिदं प्रतिपादितमस्ति, समस्तं जगदिदं भगवतः विष्णोः त्रिपादविन्यासस्य आधारेण सुस्थिरं विद्यते । तस्य पादविन्यासः अतिविशालः वर्तते, तत्र त्रिभुवनानि समाविष्टानि सन्ति । विष्णोः कार्यमिदं कठिनातिकठिनं वर्तते, तच्चकृतमस्ति, अतः जनाः अपि अतिकठिनमपि कार्यं कर्तुं समर्थाः भवन्ति, चेत् तस्मिन् साहसः स्यात् । इत्थं साहसयुक्तं कर्म यदाः मानवाः करिष्यन्ति, तदा जनाः, जीवाः, प्राणिनः, प्राकृतिकपदार्थाः अपि प्रसन्नाः भवन्ति । यथा हि दर्शितम् –

---

१. अथर्व.७/२६/०२
२. अथर्व.७/२६/०३

यस्य त्रीपूणा मधुना पदा

न्यक्षीयमाणा स्वधया मदन्ति ।

य उ त्रिधातुं पृथिवीमुत द्या

मेको उग्धार भुवनानि विश्वा ॥[1]

अथर्व. ७/२६/०४

अर्थात् पादविन्यासेन विश्वस्य समस्तप्राणिनः विष्णुप्रदत्तेन अमृतमयेन अन्नेन प्रमुदिताः भवन्ति । स्वयंविष्णु पृथयप्तेजःसु तन्मात्रारूपेण भूत्वा, स्थिरीभूय वा विश्वस्मिन् निवसति । कार्यमेतत्, विष्णोः सकलप्राणिनां कृते उत्साहवर्धकं, प्रसन्नतादायकञ्चास्ति । अर्थात् मानवानां, महामानवानां वापि कायमेतादृशं भवेदिति समाजजीविनां कृते दिग्दर्शितं विद्यते । अग्रिमेऽपि प्रतिपाद्यते यथा –

तदस्य प्रियमभि पाथो उश्यां

नरो यत्र देवयवो मदन्ति ।

उरुक्रमस्य स हि बन्धुरित्था

विष्णोः पदे परमे मध्व उत्सः ॥[2]

अथर्व. ७/२६/०५

तां वां वास्तून्युश्मसि गमध्यै

यत्र गावो भूरि श्रृङ्गा अयासः ।

अत्राह तदुरुगायस्य वृर्ष्णः

परमं पदभव भाति भूरि ॥[3]

अथर्व.७/२६/०६

---

१. अथर्व.७/२६/०४
२. अथर्व.७/२६/०५
३. अथर्व.७/१२५/०६

मन्त्रयोरिदं दर्शनं दर्शितं विद्यते; यत् मानवाः विष्णुप्रियाः भूत्वा पुण्यशालिनः स्युः । अन्यच्च प्रतिपादितं जगतीह उत्तमाः गावः निवसेयुः ।

समाजस्य कृते विचारोऽयं समृद्धिदायकः । पुण्यकामाः जनाः सत्कमार्णि विधास्यन्ति । गवां संरक्षणेन बलवन्तः अपि भविष्यन्ति । अर्थात् अत्र समाजचिन्तनं विहितम् ।

## ३.७ वाणीसूक्ते समाजव्यवस्थायाः दार्शनिक विचाराः

परब्रह्मणः, शब्दब्रह्मण वा रूपेण वेदे, वेदान्तदर्शने च ब्रह्मणः द्विप्रकारात्मकं वर्णनमस्माभिः उपलभ्यते । ब्रह्मजगतः विविधानि कार्याणि प्रादुर्भावपूर्वात् शब्दब्रह्मस्वरुपेण अभिव्यक्तानि भवन्ति । अर्थात् पदाभिव्यक्तेः पश्चात् पदार्थसृष्टिः, नामाभिव्यक्तिपश्चात्, गुणरुपयोः सृष्टिः, वाण्यभिव्यक्तेः परं अग्न्यादिदेवानां सृष्टिः एतादृशी प्रक्रिया दर्शनेऽस्मदीये विलोक्यते ।

तेन परमात्मना 'भूः' शब्दकथनात्, तदा भुलोकस्य सृष्टिः सञ्जाता ।' स भूरिति व्याहरत् भुवं व्यसजत् ।"

प्रक्रियायाः अस्याः आधारेण वाण्याः स्थानं दर्शनेऽस्मिदीये सर्वोत्कृष्टमस्ति । 'देवीं वाचं यजा महे । ' 'वाचं धेनुमुपासीत ।' 'यज्ञेन वाचः पदवीम् ' । इत्यादीनि वेदस्ये तरग्रन्थानाञ्च वचनानि वाण्याः उत्कृष्टतायाः सुन्दराणि प्रमाणानि सन्ति । इत्थं वाण्याः तात्विकचिन्तनेन समाजस्य कृते दर्शनसम्बन्धिनो विचाराः प्रादुर्भवेयुः इति अत्र चिन्त्यते तर्हि अत्रैव निरूपितम् ।

यथा –

अहं सोममाहनसं बिभ
  र्म्यहं त्वष्टारमुत पूषणं भगम् ।
अहं दधामि द्रविणं हविष्मते
  सुप्राव्ये ह यजमानाय सुन्वते ॥[१]

ऋग्वेद–१०/१२५/०२

भावार्थेन विजानीमः तर्हि सोमरससेवनकर्म, त्वष्टुः शिल्पकर्म, यजमानस्य च हवनकर्म वाण्याः पवित्रकर्मद्वारा प्रेरणादायकं विद्यते । अर्थात् एतादृशानि महत्योऽपि कर्माणि वाणीप्रभावादेव प्रेरकानि भवन्ति । अर्थात् समेषां मानवानां वाणी प्रभावजनिका स्यात् । अग्रेऽपि राष्ट्रहिताय वाणी कथम् उपयुक्ता भवेदिति वण्यते । यथा –

अहं राष्ट्री संगमनी वसूनां
  चिकितुषी प्रथमा यज्ञियानाम् ।
तां मा देवा व्यदधुः पुरूत्रा
  भूरि स्थात्रां भूर्यां वेशयन्तीम् ॥[२]

ऋ.वे.१०/१२५/०७

अर्थात् देवेषु यथा मम प्रथमं स्थानं भवति, तथा राष्ट्स्य समाजस्य च जनहितकर्मसु अपि ममाद्यं स्थानं वर्तते । अत एव सर्वे सामाजिककर्मसु मम स्थापनं विदधति । यथा सुभाषितमपि प्राप्यते ।

---

१. अथर्व.१०/१२५/०२
२. ऋ.वे.१०/१२५/०७

केयूराणि न भषयन्ति पुरूषं हारा न चन्द्रज्ज्वला
न स्नानं न विलेपनं न कुसुमं नालंङ्कृता मूर्धिजाः ।
वाण्येका समलङ्करोति पुरूषं या संस्कृताधार्यते
क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम् ॥

अर्थात् वाण्येव सर्वश्रेष्ठं भूषणमस्ति । तत्र च यस्य कस्यापि समाजस्य दर्शनं प्राप्यते । अन्ते वाणी एव सर्वकालेषु अविनाशिनी अस्ति तदपि वर्ण्यते । यथा

अहं सुवे पितरमस्य मूर्धन्
मम योनिरप्स्वन्तः समुद्रे ।
ततो वितिष्ठे भुवनानुविश्वे
तामूं द्यां वर्ष्मणीप स्पृशामि ॥[१]

ऋग्वेद–१०/१२५/०७

अर्थात् वाणी जलादीनां तन्मात्रासु निवसति । तयासर्वं प्राप्यते । परमात्मनः शक्तिरपि तत्रैव वसति । तस्य नित्यस्वरुपं इत्थमस्ति ।

अहमेव वात इव प्र वा
म्यारभमाणा भुवनानि विश्वा ।
परो दिवा पर एना पृथि
व्यैतावती संबभूव ॥[२]

ऋ.–१०/१२५/०८

---

१. ऋ.१०/१२५/०७
२. ऋ.१०/१२५/०८

अत्रोख्तमस्ति, वाणी एव आत्मनः, परमात्मनः स्वरूपं धारयित्व स्वतन्त्रं सर्जनात्मकं कार्यं विदधाति । अर्थादिह पदेषु पदेषु समाजस्य कृते दार्शनिकविचाराः प्रदत्ताः सन्ति । कथम् ? वाण्याः प्रभावेनैव समाजस्य सुचारूतया गतिः, प्रगतिः, विकास, उन्नतिः, कल्याणं, उन्नयनं इत्यादि वा भवितुं शक्यते । तां विना किमपि परिकल्पनं नैव भवितुं शक्यते ।

## ३.८ आत्मज्ञानसूक्ते समाजव्यवस्थायाः दार्शनिकविचारा :

सूक्तेऽस्मिन् ५२ मन्त्राः अल्पस्तुतिपरकाः सन्ति । संशयः, उत्थापनं, प्रश्नः, प्रति वाक्येन ज्ञानं, मोक्षः अक्षरस्य प्रशंसा सूक्तेऽस्मिन्नस्ति ।

सूक्तेऽस्मिन् स्तुतिवचनानि कानिचिदेव सन्नि । विशेषज्ञः 'पृच्छामित्वा ' इव प्रश्नाः, 'इयं वेदिः' इव उत्तरः 'य इं चकार ' इव ज्ञानप्रशंसा 'अपश्यं गोपाम्' इव ब्रहमसाक्षात्कारप्रशंसादिवचनानि विशेषेण सन्ति ।

एवमुत्तरत्रापि अध्यात्मपरतया योजयितुं शक्यम् । यत्र 'द्वा सुपर्णा' इत्यादौ स्फुटम् आध्यात्मिको अर्थः प्रतीयते ।

इत्थमत्र अध्यात्मपरकस्य अर्थस्यानुसंधानं विधातुं शक्यते । 'द्वा सुपर्णा' मन्त्रस्तु स्पष्टतया आध्यात्मिकस्य अर्थस्य ज्ञानं कारयति ।

'सर्वमेतत् सूक्तमध्यात्म परम् । नात्रान्यार्थता वक्तुं शक्या ' । अथादनेन ज्ञायते समग्रं सूक्तं अध्यात्मपरकं वर्तते ।

इत्थं यदि कानिचितां वचनानां सारं गृहीत्वा कथयितुं शक्यते । यत्, सूक्तेऽस्मिन् अध्यात्मविद्यायाः वर्णनेन समाजव्यवस्थायाः दार्शनिकमार्ग प्रशस्तः कृतः विद्यते । श्रीमद्भागवतगीतायामपि प्रतिपाद्यते । यथा – 'अध्यात्मविद्या

विद्या' । अर्थात् भगवतायि गीतं यत् समस्तविद्यासु अध्यात्मविद्या मदीयं स्वरुपं वर्तते ।

अस्मात् स्पष्टीभवति यत्, अध्यात्मज्ञानं विना समाजस्य, मानवस्य वा जीवनसाफल्यं कथमयि न शक्यम् । यथा हि कथ्यते –

स्त्रियः सतीर्स्तां उ मे पुंस आहुः
पश्यदक्षण्वान्न वि चेतदन्धः ।
कविर्यः पुत्रः स ईमा विकेत
यस्ता विजानात् स पितुष्पितासत् ॥[१]
ऋ.१/१६४/१६

अर्थादुच्यते यत् मम स्वरूपं स्त्रियः आकृतिषु विद्यते, तथापि विद्वांसः तं पुरूषाकृतिं कथयन्ति । किन्तु तं यः नेत्राणि उद्घाट्य अवलोकयति स एव वास्तविकं पश्यति, तन्न पश्यति स वास्तवे अन्धः विद्यते । ऋषिः कथयति यत्, यद दिमं रहस्यं बालः जनाति, पश्यति वा सः बाल सन्नपि, लधुपुत्रोऽपि वा पितुरपि पिता जायते । अत्रोच्यते यत् आत्मज्ञानी, अध्यात्मविद्याविशारदः लघुमानवः, लघु वया अपि महत्यदं प्राप्नोति । समाजस्य कृते दार्शनिकविचारं प्रददाति । एतद्धिचारयुक्तस्य अन्यस्य सामान्यजनस्य वा स्थितिः, कर्मनिष्ठता कीदृशी भवति, तद्यथारूपं श्रुत्या निरूप्यते ।

---

१. ऋग्वेद–१०/१६४/१६

द्वा सुपर्णा सुयुजा सखया

समानं वृक्षं परिषस्वजाते ।

तयोरन्यः पिप्पलं स्वाद्ध

त्यनश्नन्नन्यो अभि चाकशीति ॥[१]

ऋग्वे.१/१६४/२०

द्वौ पक्षिणौ संयुक्तं भूत्वा समानाभिधानं धारयित्वा समानवृक्षाश्रयं गृहीत्वा निवसतः । किन्तु एकः मधुरफलानि खादति, अन्यश्च फलानि अभक्षयन् केवलं साक्षीभावेन सर्वं विलोकयति । अर्थात् जीवात्मा जगति कर्माणि कृत्वा कर्मफलं मूक्ते परमात्मा सर्वमिदं कर्मफलाकाङ्क्षया कर्माणि न कृत्वा, निष्कामभावेन पश्यति । अर्थात् 'कर्मभिः न सः बध्यते ' । अर्थात् इह समाजव्यवस्थायाः कृते कर्मसिद्धान्तः प्रतिपादितः । अग्रेऽपि यथा –

यत्रा सुपर्णा अमृतस्य भाग

मनिमेषं विदथाभिस्वरन्ति ।

इनो विश्वस्य भुवनस्य गोपा

स मा धीरः पाकमत्रा विवेशा ॥[२]

ऋ.१/१६४/२१

यस्मिन् वृक्षे मध्यदः सुपर्णा

निविशन्ते सुवते चाधि – विश्वे ।

तस्येदाहुः पिप्पलं स्वादग्रे

तन्नोन्नशद यः पितरं न वेद ॥[३]

ऋग.१/१६४/२२

१. ऋ.१/१६४//२०

२. ऋ.१/१६४/२१

३. ऋ.१/१६४/२२

द्वयोरपि मन्त्रयोः पक्षिरूपक द्वारा जीवात्मपरमात्मनोः कर्मनैपुण्यं प्रतिपादितम् । जीवस्य कर्मणि आसक्तभावः, ईश्वरस्य निर्मोहभावः प्रतिपाद्यते । अग्रे गोधनस्य समृद्धि कथं स्यादिति निरूप्यते ।

सूर्यवसाद् भगवती हि भूया
अथोवयं भगवन्तः स्याम ।
अद्धि तृणमध्ये विश्वदानीं
पिब शुद्धमुदकमाचारन्ती ॥[१]
ऋ.१/१६४/४०

सा गोमाता सुधान्यं भक्षयित्वा, तृणं खादयित्वा, शुद्धजलं पीत्वा, भाग्यवतीं भूत्वा सर्वदा विचरती स्यात् । एतादृशं गोधनं समाजस्य तात्विकविचारपूर्णाः समृद्धिं करिष्यति । 'वाण्येका समलाङ्करोति पुरूषम् ' इतिवत् वाणीविज्ञानं निरूप्यते । यथा

चत्वारि वाक्परिमिता पदानि
तानि विदु र्ब्राह्मणा ये मनीषिणः ।
गुहा त्रीणि निहिता नङ्गयन्ति
तुरीयं वाचों मनुष्या वदन्ति ॥[२]
ऋग्वेद १/१६४/४५

---

१.ऋ. १/१६४/४०

२. ऋग्वेद १/१६४/४५

अत्र वाण्या: चत्वारि स्वरूपाणि वर्णितानि विद्यन्ते । परा, पश्यन्ती, मध्यमा, वैखरी । मानवा: तुरीयं वाच: वदन्ति । अपि तु ये वाणीविज्ञानं विजानन्ति ते आद्यान् त्रीन् प्रकारान्मपि विज्ञातुं शक्ता: भवन्ति ।

सङ्क्षेपेण त्वत्र सूक्ते जीवात्मपरमात्मन: कर्मफलसिद्धान्तेन, गोधनस्य समृद्धिकरणेन, वाणीविज्ञानेन, अन्यैश्च अध्यात्मविद्याया: विचाराणां निरुपणेन समाजस्य कृते समाजव्यवस्थाया: दाशृनिकविचारा: वर्णिता: विलोक्यन्ते । सूक्तमिदं विशालं किन्तु सारभूततत्वानि स्वीकृतानि सन्ति, विस्तारमयादस्तु ।

## ३.९ ईशसूक्ते समाजव्यवस्थाया: दार्शनिक विचारा:

ईशवास्यं, ईशसूक्तं यजुर्वेदस्य ४० तमोऽध्याय: वर्तते । ईशवास्यस्य माध्यंदिनशाखाया: सप्तदशमन्त्रा: सन्ति ।

प्रथममन्त्रस्य चतुर्षु चरणेषु उपदेश: प्राप्यते । यथा 'ईश्वरनिवास:' 'जगत:चेतना' 'लोभस्य त्याग:' सर्वेऽपि अन्ये मन्त्रा: सिद्धान्तमिमं परित: गुम्फिता: सन्ति । महात्मना गान्धिनाऽपि अकथ्यत, यदि सर्वाणि अपि हिन्दुशास्त्राणि नष्टानि स्यात्त्, तत्रापि ईशावास्योपनिषद: केवलं प्रथममन्त्रोऽवशिष्येत, तदापि हिन्दुधर्मस्य सन्देश: भाविसन्ततीनां कृते सुरक्षितो भविष्यति । यथा

ईशा वास्यमिदं सर्वं यत् किं च जगत्यां जगत् ।
तेन त्यक्तेन भुज्जीथा मागृध: कस्यस्विद्धनम् ॥[१]

यजु.४०/०१

१. यजु. ४०/०१

अर्थात् जगदिदं ईश्वरेण आवृत्तम्, तस्मात् त्यागभावेन भुञ्जीथाः, कस्यापि धनं मा गृधः । कर्मणां फलान्यपि न लिप्यते, तदग्रे निरूप्यते । यथा

कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः ।
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे ॥[१]

यजु. ४०/०२

इहलोके कर्माणि कुर्वन् शतवर्ष यावत् जिजीविषेत्, इत्थं स्वार्थरहितः पुरूषः कर्मभिः न लिप्यते । स्वार्थरहितानां पुरुषाणां कर्मभिः कीदृशः समाजः निर्मीयते । तद्यथानुलिखितमन्त्रेण विज्ञायते ।

अन्धं तमः प्रविशन्ति ।
येदसंभूतिमुपासते ।
ततो भूय इउ ते तमो
य उ संभूत्यां रताः ॥[२]

यजुर्वेद – ४०/९

निषेधार्थेन विज्ञायते लौकिकसमाजं विस्मृत्य यः जनः स्वार्थपूर्णां समृद्धिं कामयते, सः लोकः समाजस्य कर्तव्यास्वीकारात् अन्धकारं प्रविशति । अर्थात् स्वविकासेन सह समाजस्यापि विकासः स्यादिति सन्देशः उपलभ्यते ।

संभूतिं च विनाशं च ।
यस्तद्वेदोभयं सह ।
विनाशेन मृत्यं तीत्वा ।
संभूत्यामृतमश्नुते ॥[३]

यजु. ४०/११

---

१. यजु.–४०/०२
२. यजु. ४०/९
३. यजु. ४०/११

अर्थात् यो जनः 'समाजस्य सम्भूतिं, व्यक्तित्वस्य विकासश्च' इदमुभयं परस्परं सहायभावेन लाभदायकं विद्यते । मानव व्यक्तिविकासात् दुःखं, दारिद्र्यं, मृत्यं च तीर्त्वा पारं गच्छति । तत्पश्चात् विद्यामृतस्य महत्वं निरूप्यते । यथा

विधां चाविद्यां च ।

यस्तद्विदोभयं सह ।

अविधया मृत्यं तीर्त्वा,

विद्ययामृतमश्नुते ॥[१]

यजु.४०/१४

यः ज्ञानिजनः विवेकिपुरूषः व्यवहारविद्यां, शास्त्रीयविद्या उभयोर पि समन्वयं विधाय परिणामं विजानाति । सः जन अविद्यायाः दुःखं, दारिद्र्यं मृत्यं तीर्त्वा पारं गच्छति । अर्थात् सर्वाणि सांसारिकार्याणि समाप्य सत्यस्य परमेश्वरस्य स्वरुपं विज्ञाय मोक्षपदं लभते । तद्रुपं कीदृशं तर्हि । यथोच्यते –

हिरण्यमयेन पात्रेण ।

सत्यस्यापिहितं मुखं ।

तत्वं पूषन्नपावृणु ।

सत्यधर्माय दृष्टये ॥[२]

यजु.४०/१७

अर्थात् सत्यधर्मस्य दर्शमार्थं स्वर्णमयपात्रेण आवृतं मुखं अनावरणीयम् । ततः सः जीवनस्य परलक्ष्यं प्राप्नोति ।

सुक्तेऽस्मिन् मानवस्य कृते समाजव्यवस्थायाः दार्शनिकविचाराः, मानवः समृद्धः, मोहरहितः, सफलजीवितः, विद्यायुक्तः, परधनानभिलाषी केन प्रकारेण भवितुं शक्नोति । इति जीवनदर्शनस्य विचाराः निरूपिताः सन्ति ।

---

१ यजु. ४०/१४

२ यजु.४०/१७

अतः सूक्तमिदं समाजव्यवस्थायाः दार्शनिक विचारा नितरां वर्णयति ।

## ३.१० शान्तिपाठसूक्ते समाजव्यवस्थायाः दार्शनिकविचाराः ।

सूक्तस्यास्य त्रिचतुर्मन्त्रा अतीव विख्याताः सन्ति । यज्ञस्य प्रारम्भे शान्तिपाठरूपेण सूक्तमिदं पठ्यते । सूक्तमिदं 'भद्रसूक्तम्' इति नाम्नापि प्रसिद्धमस्ति । 'जगतः समस्तजनानां कल्याणं विश्वस्य देवाः कुर्युः, सर्वो जनः कल्याणीं वाणी श्रृणुयात्' इत्युत्तमां भावना प्रस्तुतास्ति ।

भद्रस्य भावनायाः आशयादेव अस्मदीयानि सर्वकार्याणि प्रारम्भन्ते । अतः सूक्तप्रारम्भे एव सद्विचारान् वर्णयति ऋषिः । यथा

आनो भद्राः कृतवो यन्तु ।

विश्वतोऽदब्धासो अपरीतास उद्भिदः ।

देवानो यथा सदमिद् वृधे

असन्नप्रायुवो रक्षितारो दिवे दिवे ॥[1]

ऋग्वेद–१/८९/०१

अर्थात् चतसृभ्यः दिशाभ्यः नः सद्विचाराः आयन्तु । दमनशीलाः, क्रूराः शत्रवः, विनाशं प्राप्नयुः । अस्माकं सर्वदा प्रगतिः तीव्रतमा स्यात् । सर्वेऽपि देवाः कल्याणका हिणः भूयासुः । यथोक्तम् –

स्वस्ति न इन्द्रो वृध्धश्रवाः

स्वस्ति नः पूषा विश्ववेदाः ।

स्वस्ति नस्ताक्ष्र्यां अरिष्टनेमिः

स्वस्ति नो बृहस्पतिर्दधातु ॥[2]

ऋग्वेद – १/८९/०६

---

१ ऋग्वेद–१/८९/०१

२ ऋग्वेद–१/८९/०६

सर्वदेवाः अर्थात् इन्द्रः, पूषा, तार्क्ष्यः (तक्षप्रजापतेः पुत्रः गरुडः), बृहस्पतिः सर्वेऽपि नः कल्याणकारिणः भूयासुः । इत्थमत्र स्वस्तिभावः निरूपितः । अस्मदीयमपि कर्म सर्वथा भद्रं भवेत् । तद्यथा प्रतिपाद्यते –

भद्रंकर्णेभि श्रृणुयाम देवा
भद्रं पश्यमाक्षभिर्यजत्राः ।
स्थिरै रंगैस्तुष्टुवासस्तनूभि
र्व्यशेम देवहितं यदायुः ॥[१]

ऋग्वेद–१/८९/०८

अर्थात् हे देवाः ! वयं कर्णेभिः भद्रं श्रृणुयाम, अक्षभिः भद्रं पश्येम, दीर्धजीवनं प्राप्नुयाम । इत्थमस्माकं सर्वकार्याणि भद्राणि स्युः । जीवनं शतशरदः यावत् स्यात् । यथा –

शतमिन्नु शरदो अन्तिदेवा
यत्रा नश्चक्रा जरसं तनूनाम् ।
पुत्रासो यत्र पितरो भवन्ति
मा नो मध्या रीरिषतायुर्गन्तोः ॥[२]

ऋग्वेद–१/८९/०९

हे देवगणा ! भवद्भिः अस्मभ्यं शतसंवत्सरं यावत् आयुष्यं सम्प्रदत्तम् । तदवधिपश्चादेव अस्माकं शरीरस्य अवयवानि वृद्धावस्थां प्राप्नुयुः ।

१ ऋग्वेद–१/८९/०८

२ ऋग्वेद–१/८९/०९

इत्थमत्र शान्तिपाठ सूक्ते समाजव्यवस्था: दार्शनिकविचारा: सद्विचारभावेन, देवेभ्य: सर्वेभ्य: कल्याणविचारेण, सर्वावयवै: भद्रशीलत्वेन, समस्तायुष उपभ्यन्ते ।

## ३.११ इन्द्रसूक्ते समाजव्यवस्थाया: दार्शनिकविचारा:

इन्द्र: वेदस्य प्रमुखदेवता विद्यते । इन्द्रादीनां व्युत्पत्तिं कृत्वा रहस्यमेकं दर्शितमस्ति । "परोक्षप्रिया हि देवा: ।"[६६] अर्थात् देवा: तेषां गुणवचाकै:, कर्मवाचकैश्चाभिधानै: सम्बोधनीया: - समाह्वनीया: । यथा -

'इन्द्र' शब्दस्य व्युत्पत्ति प्रददन् निरूक्तकार: विज्ञापयति । 'इरां- दृणाति, इन्द्रवे द्रवति, इन्धे भूतानि प्राण: समैन्धन्, इन्दं करणात्, इदं दर्शनात, इन्दति वा ।'

अर्थात् इन्द्र: सर्वगुणसम्पन्न:, पराक्रमशाली, देवानां अधिष्ठाता, देव: वर्तते । तस्य स्तवनं कृत्वा पराक्रमस्य, साहसस्य निर्देश: समाजस्य कृते विचार: प्रदत्तोऽस्ति सूक्तेऽस्मिन् । यथा

य: पृथिवी व्यथमानामदृंहद्
य: पर्वतान् प्रकुपितां अरम्णात् ।
यो अन्तरिक्षं विममे वरीयो
यो द्यामस्तभ्नात् स जनास इन्द्र: ॥[१]
अथर्व वे.२०/३४/२

अर्थात् इन्द्रेण मानवानां कृते पृथिव्या: स्थिरीकरणं, मानवस्य सङ्कटविनाश: इत्यादिकर्माणि कृतानि सन्ति । अर्थात् इन्द्रेण पराक्रमेण समाजस्य कृते सुशासनस्य विचार: प्रस्तुत: । अग्रेऽपि यथा -

१ निरुक्त-१०/१३
२ अथर्व. २०/३४/२

येनेमा विश्वा च्यवना कृतानि ।

यो एसं वर्णमधरं गुहाकः ।

श्वध्नीय यो जिउवा लक्षमाद

दर्य पुष्टानि स जनास इन्द्रः ॥[१]

अथर्व.२०/३४/४

शत्रून् विजित्य तेषां धनसमृद्धिं गृहणाति स इन्द्रः । इन्द्रेण विश्वस्य पदार्थाः गतिशीलाः कृताः सन्ति । दस्यवः, अधमासुराः इन्द्रेण नरक प्रेषिताः । अर्थात् इन्द्रः मानवानां संरक्षकः आततायिनां निहन्ता विद्यते । स्वपराक्रमात् समाजे शान्तिं स्थापयति । अन्तिमे च मन्त्रे यथेदं निरूयते ।

यः सुन्वते पचते दुध्र आ चिद

वाजं दर्दर्षि स किलासि सत्यः ।

वयं त इन्द्र विश्वहं प्रियासः

सुवीरासो विदथमा वदेम ॥[२]

अथर्व.२०/३४/१५

अर्थात् - हे इन्द्र ! त्वं दुर्धर्षः असि । वयं हवनं कुर्वार्णाः स्मः । अस्मभ्यं अन्नं, बलं वारंवारं प्रदेहि । त्वं सत्यमसि, वयं त्वदीयस्य प्रियाः स्याम । इत्थमत्र स्तुत्येन बलान्नयोः आकाङ्क्षा विहितास्ति ।

इत्थमत्रेन्द्रसूक्ते समाजव्यवस्थायाः दार्शनिक विचाराणां कृते, समाजस्य कृते इन्द्रः स्वपराक्रमात् यदि सर्वं लभते, तर्हि जनाः अपि स्वपराक्रमात् - अर्थात् प्रचण्डपरिश्रमेण निश्चितलक्ष्यं प्राप्तुं शक्नुवन्ति निशङ्कम ।

---

१. अथर्व. २०/३४/४

२. अथर्व.- २०/३४/१५

विशेषन्तु संक्षेपेण कथयितुं शक्यते यत् वैदिकवाङ्मये सर्वत्र समाजव्यवस्थायाः दार्शनिकविचाराः सन्ति । किन्तु प्रमुखसूक्तानां सारभूतविचारान् संशोध्य निरूपिताः विद्यन्ते । यतो हि विचारा इमे समाजस्य कृते उपकारका स्युः । संशोधितविचारान् वर्णयित्वा प्रकरणमिदमिहैव समाप्यते ।